पिंगलव्याख्या

५५१

१२ पत्राणि

पिं० ल० टी

१

॥ श्रीगणेशाय नमः॥ ॐ नमो महेश्वराय॥ ॥ गौरीकल्पलताविभक्तवपुषं श्रीकंठकल्पद्रुमं भ
क्तानामचिरादभीष्टफलदं नत्वा सतां प्रीतये॥ वेदे वृत्तमदीपयद्ग्रथितवान्यो वृत्तरत्नावलीं श्री
मत्पिंगलनागराजरचनां व्याख्याति स श्रीपतिः॥ १॥ तर्काभियोगरणकर्कशता मतो चेत्सूक्तिः कु
तोऽत्र मसृणा मधुरेण मन्ये॥ दृष्टं यतोस्ति सुकुमारशिरीषपुष्पे वृत्तं निसर्गकठिनं खलु चित्ततोपि
॥ २॥ टीकास्ति पिंगलग्रंथे यद्यप्यन्या पुरातनी॥ विशेषं तदपि ज्ञात्वा धीराः पश्यत मत्कृतिं॥ ३॥ इमां
छंदोविद्यां सदयहृदयः प्राह गिरिशः फणीन्द्रायाख्यातः स गरुडभिया पिंगल इति॥ द्विजस्या
स्यस्नेहादपठदथ शिष्योऽतिसुमतिः स्वकांतां संबोध्य स्फुटमकथयत्सोखिलमिदं॥ ४॥ इहाया
तः सुमतिस्तां विद्यामधीत्य छंदोग्रंथं साधारणजनोपयोगार्थमपभ्रंशेन चिकीर्षुस्तस्य विघ्नवि
घातद्वारा समाप्तिकामः स्वगुरोः पिंगलाचार्यस्योत्कीर्तनरूपं शिष्टाचारपरिप्राप्तं मंगलमादौ कुर्व

२

एम०

१

न्नाह॥ जोविविहइति॥ ॥प्राकृतानाम देवीवाक्तइवं प्राकृतं विदुः॥ अपभ्रष्टा च या तस्मात्साऽप
भ्रंशसंज्ञिका॥ तिङंते च सुबंते च समासे तद्धितेपि च॥ प्राकृतादल्पभेदैव अपभ्रष्टा प्रकीर्त्तिता
॥ देशभाषां तथा केचिदपभ्रंशं विदुर्बुधाः॥ तथा॥ संस्कृते प्राकृते वापि रूपसूत्रानुरोधतः॥
अपभ्रंशः स विज्ञेयो भाषायां यत्र लौकिकी॥ ॥यो विविधमात्रासागरपारंप्राप्तोपि विमल
मतिर्हेलं॥ प्रथमभाषातरंडो नागः स पिंगलो जयति॥ ॥अस्यायमर्थः स नागः पिंगलो जयति
उत्कर्षेण वर्द्धतां॥ एतेन तदधीनसमृद्धेरात्मनः समृद्धिमाशंसनेन नाशंसनीया गुरव इति दोषो
न स्यात्॥ स कः। यो विमलमतिर्हेलं यथा स्यादेवं विविधमात्रासागरपारंप्राप्तोपि। अपि संभावना
यां अवधारणे इति प्राचः॥ विविधमात्रा गुरुलघुरूपा सैव सागरो दुर्विज्ञेयत्वात्॥ मात्राशब्देनात्र
वर्णस्यापि ग्रहणं तस्य मात्राघटितत्वात्॥ तथाहि॥ एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते॥

त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंजनं चार्द्धमात्रिकं॥ निर्मलबुध्या अनायासेन गुरुलघुरूपमात्रा वर्णसमु
द्रस्य पारं तीरं अशेषत्वं गतः॥ इह ग्रंथे आदौ मात्रा कीर्त्तनान्मात्राया एव प्राधान्याद त्रोपन्यास इ
त्यन्ये। प्रथममादौ भाषातरंडः भाषा लौकिकपदप्रयोगः। भाषा एव तरंडा नौर्यस्य स तथा॥ भाषाक
विः स पिंगल एव आद्यकविरिति प्रसिद्धमेव। मात्रा भाषा शब्दयोर्द्वन्द्वः। पादालिनीतरंडा नौरिति हा
रावली। तथा च प्रसिद्धिः॥ बुभुक्षोर्गरुडस्य पुरस्तात्प्रबोधवचनेन प्रस्तार लिखन व्याजेन एकदैकत्र
लिखितं द्वितीयस्थाने इत्थं तदेव गरुत्मता पिंगलो भोक्तव्य इति व्यवस्थाय षड्विंशत्यक्षरप्रस्तारं
कृत्वा समुद्रे निर्म्मज्य पारं गत्वा आत्मानं रक्षितवान्॥ ततो हेतोरर्थांतिरमपि॥ पिंगलो जयति॥ यो
विमलमतिर्हेलं यथास्यादेवं विविधमात्रासागरमपि प्राप्तः। नानाविधमात्रैव सागर इत्युपमानप
र्वपदः कर्मधारय एव॥ उपमानानि सामान्यवचनैरिति समासः। अवधारयितुमशक्यतया मात्रा

राम०
२

सागरयोः साम्यं। कथं मतः गणो ज्ञातः अर्थाङ्गरुडेन॥ अपिशब्दात् ब्राह्मणव्याजेन वेषधारी भिक्षु
कः शेषनागत्वेन ज्ञातः॥ ज्ञो गण इति गणत्वं॥ यथा राज्ञी राणी। तर्हि सागरपारं कथं प्राप्तम् इत्याह॥ प्र
थमं भाषान्तरं उः आदौ प्रबोधवचनमेव तरंडा नौका यस्य स तथोक्तः॥१॥ ननु गुरुलघुरूपमात्रा
सागरे को गुरुः को लघुरित्याह दीहो इति॥ दीर्घः संयुक्तपरो बिंदुयुतः पातितश्च चरणान्ते॥ स गुरुर्व
क्रो द्विमात्रो अन्यो लघुर्भवति शुद्ध एककलः अयमर्थः॥ स गुरुर्भवति द्विमात्मकः॥ द्विमात्रो मात्राद्व
यघटितः॥ कीदृशो लेखनीयः वक्रो दात्राकारः वक्रादिषु चेत्यनुस्वारः। सकः। दीर्घो ह्रस्वेतरः। तेन प्लुतो
पि गुरुः। आकारादिकमसम्मतिसंध्यक्षराणि गुरूणि॥ अपरं तथा बिंदुयुतो वर्णो गुरुः। संयुक्तः प
रो यस्येति बहुव्रीहिः। यथा हर्षध्वज इत्यत्र षकारस्य गुरुत्वं। बिंदुभ्यां युत इति समासस्यानुस्वारविस
र्गयोर्ग्रहणं। विसर्गो तस्यापभ्रंशेऽसंभवात्तद्विशिष्येनोक्तं। संस्कृते तथाप्युपकरिष्यति॥ पातितश्च च

पिं० ल० टि०
३

रणांते० चशब्दोविकल्पार्थः। तेनपादांतेवैकल्पिकोयंविधिः। उक्तादन्योवर्णएकमात्रारूपोवाएकमा
त्रोवालघुर्भवति। सचैककलात्मकः कथंलिख्यतामित्याह। शुद्धः सरलोदंडाकारइतियावत्॥ २॥ उ
दाहरणेनतत्स्फुटीकरोति॥ माईइति॥ सख्याआलापः। हेमातः तंशंभुंकामयमानासागौरीगर्हितत्वंक
रोति० वरगुणरहितंपतिमिछंती इत्यर्थः। तंकंयोदेवमात्राख्ययाप्रसिद्धोरूपेणसौंदर्येणहेयोवि
रूपाक्षत्वात्॥ हीनोऽकुलीनोऽलक्षजन्मत्वात्। जीर्णोजरातुरोमहावृद्धइत्यर्थः कदाचिद्धस्त
णोप्याद्यत्वात्॥ ३॥ गुरोरपवादमाह० कत्थविइति॥ कुत्रापिसंयुक्तपरोवर्णोलघुर्भवति दर्शनेन
लक्ष्यानुरोधेन। यथाउदाहरंति॥ परिस्खलतिचित्तधैर्यंतरुणीकटाक्षेनिर्दृष्टंसंगतं॥ उद्दृत्त्वा
दित्युत्वंपरिल्हसइत्यत्रसंयुक्तपरतयागुरुत्वेगाथालक्षणविरोधापत्तेः। ४॥ गुरुताविकल्प

माह० इहिआराइति॥ इकारहिकारौबिंदुयुक्तौ० एओशुद्धौवर्णौमिलितावपिलघू॥ रहव्यंजनसं

एम०
३

योगेपरतोऽशेषमपिसविभाषं॥एतदशेषंसविभाषंसविकल्पंलघुभवतियथासन्निवेशंल
घुगुरुश्चभवतीत्यर्थः॥एतत्रकतमत्।इकारहिकारौसानुस्वारौएओइत्येतौअचौशुद्धौकेवलौ
चकारादौमिलितावपिचलघुभवतः।इहइत्येताभ्यांहल्भ्यांयःसंयोगस्तस्मिन्परतःपूर्वमस्व
रंच॥अथच॥परत्रपादांतेअशेषमपिसविकल्पंगुरुत्वमापद्यते॥५॥उदाहरतियथा॰माणि
णिइति॥सखीवदति।मानिनिमानैःकिंफलंएषयदिचरणोपतितःकांतः।एओंजेइतिवारेंदीभा
षा।एषयदीत्यर्थः।अत्रार्थांतरन्यासः।सहजेनभुजंगमोयदिनमतितदामणिमंत्रौकिंकुरुतः।ता
वन्मानःप्रकर्त्तव्योयावत्पादानतोभवेदितिभरतेमानकालःप्रियप्रणिपातपर्यंतंकथितः॥६॥
रहव्यंजनसंयोगेयथाउदाहरति।चेउइति॥हेचेतःसहजेनत्वंचंचलंसुंदरिहृदयेवल्लतरसर
।खुल्लणाइतिदेशीयभाषाअज्ञेवर्त्तते।हेअज्ञपदमपिनददासिक्रीडसिपुनस्सल्लसत।वैकल्पि

पि॰ल॰टी
४

कीविभाषा॥ ७॥ अपरं विशेषमाह॥ जइइति॥ यदि दीर्घोपि वर्णो लघुजिह्वया पठ्यते भवति
सोपिलघुः॥ वर्णोपित्वरितपठितोयदि तदाद्वौत्रीनपि वर्णानेकं जानीत॥ ८॥ उदाहरति अ
रेरेइति॥ हे कृष्ण क्षुद्रां नावं वाहय संचालय दुःखं न देहि। त्वं अस्यां नद्यां संतार्य्य यत्रार्थ्य यस्मि
तद्गृहाण। नाविकबुध्यारे इति संबोधनं युक्तं। प्रथमप्रतीके लघुजिह्वापाठात् लघुत्वं द्वितीय
प्रतीके इकारएकारमकाराणां त्वरितपठितानामेकवर्णता॥ ९॥ किमनेनपरिश्रमेणेत्यतआ
ह॥ जेमणइति॥ यथा न सहते कनकतुलातिलतुलनामर्द्धार्द्धेन। इत्थं न सहते श्रवणतुला
अपछंदछंदोभंगेन। यथा कनकतुला स्वभावादेवाभयदिशि समेवावतिष्ठते एकत्रतिलमा
त्रगुरुत्वेपि विषमा भवति॥ इत्थमनेनैव प्रकारेण सभ्यानां श्रवणतुला छंदोभंगेन जातम
पछंदोन सहते॥ कनकतुलातिप्रसिद्धा॥ अतः छंदो विशुद्धकवित्वं कृत्वा सज्जनमनोरंजना

एम॰
४

लाभः स्यादिति पूजादिना सुखिं भवति। छंदोध्ययनं प्रकृत्यो दयिमेतत्॥ १०॥ छंदोध्ययनं
विना काव्यतिरिस्याह॥ अबुद्ध इति॥ ॥ अबुधो बुधानां मध्ये काव्यं यः पठति लक्षणविहीनं
॥ भुजाग्रलग्नखड्गेन शीर्षं खंडितं न जानाति॥ लक्षणविहीनोऽनधीतवृत्तलक्षणः॥ छंदः पंडि
तवृत्तं भूषणमेव खड्गः॥ काव्यमेव शिरः। तस्माच्छंदोऽवश्यमेव पठनीयं॥ ११॥ मात्रायाः प्राधा
न्यादादौ मात्रागणव्यवस्थां करोति॥ टठडढणा इति॥ मध्ये अक्षराणां पंचाक्षराणि गणभेदा
भवंति॥ के ते॥ टठडढणाः। त एव यथासंख्यं छपचतदसंज्ञका भवंति। कुत्र संकेतिताः षट्पंच
चतुस्त्रिद्विकलासु॥ तथा च॥ षट्कलः टगणः स एव छगणः पंचकलः ठगणः स एव पगणः।
चतुःकलो डगणः स एव चगणः। त्रिकलो ढगणः स एव तगणः। द्विकलो णगणः स एव दग
णः॥ १२॥ तेषां गणानां कियंतो भेदा भवंतीत्याह॥ टगणा इति॥ टगणाः षट्कलात्मकस्त्रयोद

शभेदो भवति॥ त्रयोदशभेदा यस्येति बहुव्रीहिः॥ ठगणस्य पंचकलात्मकस्याष्टौ भेदा भवं
ति। डगणस्य चतुःकलात्मकस्य पंच भेदा भवंति॥ ढगणे त्रिकलात्मके त्रयो भेदाः स्युः॥ णगण
स्य द्विकलात्मकस्य द्वौ भेदौ भवतः एतेषां भेदाः प्रस्तारसंख्याकृताः॥ १३॥ प्रस्तार एव कथं ज्ञा
तव्य इत्यपेक्षायामेकया गाथया मात्रावर्णसाधारणेन प्रस्तारं प्रस्तौति पढम इति॥ प्रथम गु
रोरधःस्थाने लघुं परिस्थापय आत्मबुद्ध्या। सदृशी सदृशी पंक्तिः उद्धृतं गुरुं लघुं देहि॥ अय
मर्थः॥ सर्वगुरोः सर्वलघुपर्यंतं प्रस्तारो भवति। आत्मबुद्ध्या सम्यक् हृत्कलाय त्रयः प्रथमो गुरुस्त
स्याधस्ताल्लघुं स्थापयित्वा यथोपरि तथा शेषं वारंवारं लिखेत्॥ उद्धृते पर्वस्थाने सावकाशे गु
रुणा प्रस्तारसंख्यां पूरयेत्॥ मात्राप्रस्तारे एकया कलया अपूर्णे लघुं कलाद्वयेन अपूर्णे गुरुं
देहि॥ यावत्या यावत्याः कलायाः प्रस्तारावधिस्तावती कला सर्वत्र पूरणीया॥ पर्वे पर्वस्थाने अ

न्ये गुरवो लेख्याः। एकाकलाचेद् दृत्ता गुरोः पूर्वस्थाने लघुर्लेख्यः। अन्यत्समानं। वर्णप्रस्तारः प्रका
रांतरेणापि संभवति॥ तथाहि एकगुरोरधःस्थाने एकं लघुं दद्यादिति। एवं वर्णप्रस्तारः। तत्र एके
कवर्णवृद्धौ तमेव प्रस्तारमधोधः क्रमेणाद्विगुणीकृत्य पूर्वार्द्धांते सर्वत्र गुरुमपरार्द्धांते सर्वत्र ल
घुं दद्यादित्येवं प्रस्तारवृद्धिः॥ १४॥ अथ षट्कलप्रस्तारे गणानां नामानि॥ हर इति॥ हरः १। शशी॥ २
स्मरः। ३। शक्रः। ४। शेषः। ५। अहिः। ६॥ कमलं। ७। ब्रह्मा। ८। कलिः। ९। बंधः। ९। ध्रुवः। १०॥ धर्मा। ११।
शाली॥ १२। चरः। १३। एते त्रयोदश इष्टदेवताः षण्मात्रे प्रस्तारे जातानां त्रयोदशगणानां ज्ञात
व्याः। एतदीयत्वेन एतान्येव नामानि तेषां गणानां बोद्धव्यानि॥ प्रयोजनमग्रत एव हि। ते ते शब्दाः
प्रत्येकं ज्ञेयाः॥ १५॥ पंचकलप्रस्तारे गणानां नामानि॥ इंद्रासनमिति॥ इंद्रासनः। १। अपरः
स्मरः। २। चापः। ३। हीरस्थ। ४। शेषरः। ५। कुसुमं। ६। अहिगणः। ७। पापगणः। ८॥ ध्रुवं निश्चि

तंपंचकलेगणोकथितः अर्थाद्देवताः ॥१६॥ चतुःकलानांगणानांनामानि॥ गुरुजुअइति
॥गुरुयुगः कर्णः।१।गुर्वंतः करतलं।२।गुरुमध्यः पयोधरः।३। आदिगुरुर्वसुचरणः।४।विप्र
ःसर्वैर्लघुभिः।५॥१७। अथत्रिकलानांत्रयाणांगणानामेकैकयागाथयानामानि॥ धअइ
ति॥ लघुकालंबेनआदौलघुंविन्यस्यत्रिकलप्रस्तारेप्रथमस्यैतानिनामानिहेपंडिताःजानी
तयूयमित्यर्थः। नामान्यस्यः ध्वजः।चिह्नं।चिरंचिरालयः। तोमरं।तुंबरुपत्रं।चूतमाला।रसः।वा
सः।पवनः।वलयं।लघुकालंनेतिविषमकलप्रस्तारेप्रथमतोलघुर्लेखनीयइत्यभिप्रायंपिंग
लःस्फुटीचकार॥१८॥ मध्यगणस्यनामानि॥ सुरइति॥ सुरपतिः।पटहः।तालः।करतालः।आ
नंदः।छंदं।निर्वाणं।समसमुद्रंतर्यं।समुद्रेणसहवर्त्तेतइतिससमुद्रं॥१९॥ अथनगणस्यना
मानि॥ भाइइति॥ ॥अस्यत्रिलघुगणस्यइतिइतिनामकविवरःपिंगलोभणति॥ भावः१

रसः २ तांडवं ३ नारी ४ कुलभाविनी ॥ ५ ॥ एतन्नामपंचकं त्रिलघुगणस्येत्यर्थः ॥ २० ॥ द्विकल
प्रस्तारे गुरुर्लघुयुगं च भवति ॥ तत्र गुरोर्नामानि ॥ ऽ ऽ इति ॥ अनेन गुरोर्नामानि भवंति ॥ नूपु
रः । १ । रसना २ । आभरणं । ३ । चामरं ४ । फणी ५ । मुग्ध ६ कनकं । ७ । कुंडलकं । ८ । वक्रं ९ मानसं
१० वलयः ११ । हारावलीति । १२ ॥ २१ ॥ ॥ लघुयुगरूपकगणस्य नामानि ॥ ।। इति ॥ द्वि
लघोर्गणस्य समासकविदृष्टं संक्षेपकविदृष्टं नाम निजप्रियः । १ । परमप्रियः । २ सुप्रियः । ३ । स
मासकविः पिंगलः ॥ अल्पाक्षरेण प्रचुरार्थप्रतिपादकत्वात् ॥ अथ यद्यपि चतुर्मात्रप्रस्तारे प्र
तिगणमेकैकानि कथितानि नामानि तावता शास्त्रव्यवहारो न स्यादिति पुनः प्रतिगणमेकैक
या गाथया फणिराजः प्रतिगणं भणति ॥ २२ ॥ सुरअलअ इति ॥ तस्य चतुःकलप्रस्तारे गणव्य
क्तीकृत्य कथितस्येत्यर्थः । कर्णसमानेन यथा पर्वं कर्ण इति नाम तथा तत्र समानेनैव नाम स

महेनलक्षितो॰ यंगणः। सुरतकं।गुरुद्युगलं।रसिकमनोलग्नं।मनोहरणं।सुमतिः।लंबितं
।हलनहितं॥ २३॥ गुर्वंतगणस्यैतानिनामानि॥ करइति॥ ॥करः १।पाणिकमलं।२।हस्त
।३।बाहुः।४।भुजदंडः।५। प्रहरणं।६। अशनिः।७। गजाभरणं।८। रत्नं।९। नानाभुजाभर
णानि॥ २४॥ मध्यगुरुगणस्यैतानिनामानि॥ भुजइति॥ भूपतिः १ अश्वपतिः २ नरपति
ः ३ गजपतिः ४ वसुधाधिपः ५ राजा ६। गोपालः। ७। अपरोनायकः ८ चक्रवर्ती ९ पयोधरः
१० पवनः ११ नरेंद्रः १२॥ २५॥ गुर्वादिगणस्यैतानिनामानि॥ पञ्चइति॥ पदः १ पादः २ चरणयु
गलं ३ अपरंप्राकाशयतिगंडः ४ बलभद्रः ५ तातः ६ पितामहः ७ दहनः ८ नूपुरः ९ रत्नि १० ज
घयुगलेन ११॥ २६॥ अथचतुर्लघुगणस्यैतानिनामानि॥ पदमंइति॥ प्रथमंईदृशिविप्रः १ द्वि
तीयेशरः पंचजातिशिखरेणद्विजवरः ३ चरमेचतुर्थेपादेभवतिचतुष्केणलघुकेन॥ २७॥ पंच

कलानां प्रत्येकं नामानि। सुराेर इइति॥ सुनरेंद्रः १ अहि २ कुंजरः ३ गजवरदंता ४ दंती ५ अथमे
घः ६ ऐरावतः ७ तारापतिः ८ गगनंच ९ रूपः १० तल्पः ११॥ २८॥ मध्यमलघुकस्यपंचकल
गणविशेषस्यनामानि॥ पक्षि इति॥ मध्यलघुकेगणे एतानिनामानिविजानीहि॥ एतानि
कानि। पक्षी १ विरालः २ मृगेंद्रः ३ वीणा ४ अहिः ५ पक्षः ६ अमृतं ७ जोहलं ८ सुपर्णः ९ पन्न
गाशनः १० गरुडः २९॥ पुनः पंचकलगणमात्रस्यनामानि॥ बहु इति॥ बहुविविधप्रहरणैर्ना
नाविधायुधवाचकैः शब्दैः पंचकलोगणोभवति॥ पंचकले संक्षेपेणोक्तं॥ चतुः कलेसंक्षिपति
॥ गअरहेति॥ गज १ रथ २ तुरंग ३ पदाति ४ नाम्ना चतुर्मात्रिकान्गणान्जानीहि॥ ३०॥ अ
थगणेद्विकलप्रस्तारेकथितान्यपिनामानिगुरुलघुनामकथनप्रस्तावेस्मारयति॥ तालंक इ
ति॥ तालंकहारनूपुरकेयूराणिभवंतिगरुभेदाः॥ गणेनामानिभवंतीत्यर्थः॥ वस्तुतस्तुशेष

नागस्यसहस्त्राननत्वात्पुनरुक्तिर्नदोषाय॥ लघोर्नामानि॥ सरइति॥ शरः मेरुः दंडः। काह
लः॥ अन्येचपेवाद्याभिधायिनः शब्दाः कलकला दयः। रूपरसगंधस्पर्शा श्च॥ कुसुमवाचिन
श्चयेशब्दास्तैर्लघुमेवजानीत॥ ३२॥ अथवर्णगणाः॥ ॥मोति इति॥ मोमगणस्त्रिगुरुः।
नोनगणस्त्रिलघुः। लघुगुर्वादीयमौ· लघुरादौयगणे॥ गुरुरादौभगणे॥ जगणोमध्यगुरुः।
रगणोमध्यलघुः। सगणः पुनरंतगुरुः तगणोपित्र्यंतलघुकेनभवतिइत्यर्थः॥ ३३॥ अथग
णानांदेवताआरुपद्रवीति॥ पृथिवी॥ जलं· शिखिवातः गगनं· सूर्यः चंद्रमाः नागः एतात्रअष्ट
गणेइष्टदेवतायथासंख्यंमगणादितः· पिंगलेनकथिताः॥ ३४॥ अथगणानांमित्रामित्रादिकं
निरूपयतिः। मगणेति। मगणनगणौमित्रेभवतः। यगणभगणौभृत्यौभवतः। जगणतगणौउ
दासीनौभवतः॥ अवसिष्टौमगणरगणौअरीनित्यंभवतः॥ ३५॥ अथगणानांफलानिं॥ म

राम०

८

गणेति।मगणः ऋद्धिंस्थिरस्कंधत्वंचददाति।यगणः सुखसंपदंददाति।रगणोमरणंसंपादय
ति॥जगणः खरकिरणसंतापंविसर्जयति॥तगणाश्शून्यंफलंकथयति॥सगणः स्वदेशादुद्वा
सयतिः।भगणः अनेकमंगलंस्थापयति॥पिंगलकविर्भाषते॥यावत्काव्यंगाथांद्विपदींचजाना
तितत्रयदिनगणः प्रथमंभवति॥तदातस्यऋद्धिबुद्धिः सर्वस्फुरतिरणेदुस्तरंतरति।तत्रयदि
नायकस्यक्रियतेतदाद्भुतंमंदमद्भफलं·देवतानांक्रियतेचेत्तन्नगणविचारः॥३६॥अथकवि
त्वादौगणद्वयविचारेफलान्याह·मित्रेइति·यदिकथमपिग्रंथादौमंदोगणोभवतितदातद्वसार्थं
गणद्वयविचारः क्रियते॥यदिमित्रगणान्मित्रगणएवभवतितदाऋद्धिबुद्धिंचददाति॥यदिमि
त्रगणात्तभृत्यगणोभवतितदास्थिरस्कंधत्वंयुद्धेनिर्भयत्वंचददाति॥यदिमित्रगणादुदासीन
गणोभवतितदाकार्यबंधोनभवति॥यदिमित्रगणाच्छत्रुगणोभवतितदागोत्रजाबांधवास्त्वपी

ध्यंते॥यदिभृत्यगणान्मित्रगणोभवति॥तदासर्वंकार्यंभवति।भृत्यगणाद्भृत्यगणेचसर्वेवशगा
भवंति॥यदिभृत्यगणादुदासीनगणोभवतितदाधनंनाशमाप्नोति॥यदिभृत्यगणाद्वैरिगणोभ
वतितदाआक्रंदोभवतिनायकोविनश्यतीत्यर्थः॥३७॥यदिउदासीनगणान्मित्रगणोभवतितदा
कार्यबंधंकथयति॥यदिउदासीनगणात्भृत्यगणोभवति॥तदासर्वेवशगाभवंति।यदिउदासि
नगणात्उदासीनगणएवभवतितदानमंदंनमहत्सामान्यमेवफलंभवति।यदिउदासीनग
णात्शत्रुगणोभवतितदागोत्रजाअपिशत्रवोभवंति॥यदिशत्रुगणान्मित्रगणोभवतित
दाअन्यंफलंस्यात्॥यदित्रैशत्रुगणात्मित्रगणोभवतितदागृहिणीनश्यति॥यदिपुनःशत्रु
गणादुदासीनगणोभवतितदाधनंनश्यति॥यदिशत्रुगणात्शत्रुगणएवभवति·तदानाय
कोनाशमाप्नोति॥३८॥अथमात्रावृत्तानांउद्दिष्टंनिरूपयति।पुव्वइति॥तत्रषट्कलप्रस्ता

रेएकोगुरुर्द्वौलघूपुनरेकोगुरुरित्येवमाकारोगणः कुत्रास्तीतिप्रश्ने कृते तदाकारंगणंलि
खित्वाएवंयुगलसमानांकोदेयः एवांकमेकीकृत्यतत्संख्यांकोंकोदेयइत्यर्थः॥ तत्रचआदि
कलायांप्रथमोंकोयः द्वितीयकलायांएवमेकैवकलास्तिएवंयुगलसमानांकोनास्तितेनद्वि
तीयोंक २ एवदेयः॥ तृतीयकलायांएवंयुगलसमानांकस्तृतीयांक ३ स्तेनस्तृतीयांकोदेय
॥ चतुर्थकलायांपंचमः ५ पंचकलायांअष्टमः। षष्ठकलायांत्रयोदशः॥ १३॥ गुरुस्तुद्विकलात्म
कोभवति। तेनउपरिअधश्चांकद्वयंदेयं। लघोस्तुएककलात्मकत्वादुपर्येवेतिविवेकः एवंचसति
पेगुरुमर्द्धांकास्तैः शेषांकोल्लोप्यः॥ लुप्तेचशेषांकेअवसिष्टेनांकेनस्थानंजानीत॥ तदंकसम
प्रस्तारस्थानस्थोपंगणाइतिवदेत॥ तत्रचप्रथमोंकोगुरुमर्द्धनिदेयः। द्वितीयांकअधएवदेयःते
नात्रचगुरुमर्द्धावस्थितमंकद्वयंवर्त्तते॥ प्रथमगुरुमर्द्धन्यवस्थितःप्रथमोंकः॥ अपरगुरुमू

द्वन्यवस्थितस्याष्टमांकः। तदुभयमेकीकृत्य शेषेत्रयोदशांके लुप्ते चतुर्थांकस्तिष्ठतीति तेन तत्रस्थो
यं गण इति जानीतेति भावः। एवं च पूर्वयुगलक्रमो बोद्धव्यः॥ एवमधिककलास्वपि ज्ञातव्यं॥३९॥
अथ मात्रावृत्तानां नष्टं निरूपयति॥ गादुइति॥ ॥षट्कलप्रस्तारे सप्तमस्थाने कीदृशो गण
इति प्रश्ने कृते। षडपि कलाः पृथक् लेख्याः। पूर्ववत् तत्रांकादेयाः। प्रश्नांकशेषांके लुप्ते त॥४०॥त
त्र लुप्तावशिष्टाः शेषांके पूर्वपूर्वतरांकमपि लुप्येत॥४०॥ तथा च सति यो योंको पतत्यत्र भागम्प्रा
प्नोति सा सा कला उत्तरकलां नीत्वा गुरुतामेति इत्येवं कथयति सत्यं पिंगलनागः॥ तथा चात्र प्र
श्नांकः सप्तांकस्तस्मिन् लुप्ते षष्ठांकस्तिष्ठति॥ तत्र पंचमकलांके लुप्ते एकांकस्तिष्ठति॥ तत्र
प्रथमांक एव लोपं गच्छतीति भावः॥४१॥ अथ वर्णवृत्तानामुद्दिष्टं॥ अक्रवरइति॥ तत्र चतुर
क्षरप्रस्तारे द्वौ गुरू एको लघुरेको गुरुरित्येवमाकारो गणः कुत्रास्तीति प्रश्ने कृते तदाकारं प्रश्नग

10

णां लिखित्वा प्रथमं प्रथमांको देयः॥ ततो द्विगुणान् द्विगुणान् अंकान् देहि इति प्रकारेण उद्दि
ष्टगुणानं कुरु॥ ततो लघोरुपरियोंक स्तत्राधिकमेकमेकं दत्वा तत्रैकीकृत्य यद्भवति तदंकसमा
नस्थाने सगणोस्तीति ज्ञातव्यं॥ ४२॥ ॥अथ वर्णोद्दिष्टानोनष्टं॥ ॥णाहे इति॥ पुनः श्चतुरक्ष
रप्रस्तारे सप्तमस्थाने कीदृशो गणोस्तीति प्रश्ने कृते प्रश्नांको विभाज्यः। समे भागे सति लघुर्ज्ञेय
ः॥ विषमे तु भागे एकं दत्वा पुनर्विभजेत् तदा गुरुर्भवति॥ एवं पुनः पुनर्भागे समभागे लघुर्ज्ञात
व्यः। विषमे एकं दत्वा भागे कृते गुरुर्ज्ञातव्यः एवं यावत्स्वरणां भवति तावद्विभजनीयोंक इत्यर्थः॥
४३॥ अथ वर्णमेरुः॥ ॥अक्खर इति॥ ॥एकाक्षरप्रस्तारे कति सर्वगुरवो भवंति। कति सर्वल
घवः॥ द्व्यक्षरप्रस्तारे कति सर्वगुरवः। कति एकगुरवः॥ कति सर्वलघवः॥ एवं त्र्यक्षरचतुरक्षर
प्रस्तारे षड्विंशत्यक्षरपर्यंतं एकैकगुरुह्रासेन प्रश्ने एषा प्रक्रिया॥ प्रथमं मेकं कोष्टं लिखित्वा त

एकाधोद्वयं·तदधस्त्रयं·तदधश्चत्वारि·तदधः पंच एवमधोधः पंक्तयो लेख्याः॥ तत्र कोष्टगदेष्वादौ
तथान्ते प्रथमांको देयः। मध्यमस्थान्यकोष्टकेषु तदीयतदीयशिरःस्थकोष्टद्वयांकसमानांको देयः।
एवमन्यत्रापि पूरणीयकोष्टानां उपरिस्थितांकद्वयमेकीकृत्य पूरणं विधेयं। वर्णमेरौ चतुरक्षर
प्रस्तारे प्रथमं चतुर्गुरुर्गणोस्ति ततस्त्रिगुरवश्चत्वारो गणास्ततो द्विगुरवः षट् गणास्तत एकगु
रवश्चत्वारो गणास्ततः सर्वलघुरेको गणोस्तीति स्फारितमस्ति। एवं पंचाक्षरादावपि॥ ४४॥ ॥
अथ वर्णपताका॥ उद्दिष्टासरि इति॥ ॥ तत्र चतुरक्षरे सर्वगुरुः कुत्र स्थानेस्ति। त्रिगुरुः कुत्रा
स्ति॥ द्विगुरुः कुत्रास्ति। एकगुरुः कुत्रास्ति॥ सर्वलघुः कुत्रास्तीति प्रश्नेयं क्तिक्रमेणांकाधार
णीयाः॥ उद्दिष्टासरीति॥ तत्र षोडशांकाः पूरयितव्याः प्रथमपंक्त्यधः स्थिताः॥ पूर्वांकेनाप
रांकमेकीकृत्य भरणं कुर्यात॥ प्राप्तमंकं पूर्वांकस्य परभागे स्थापयेत्। यदि प्रथमपंक्ति पूर्वांके

नभरणं न भवति तदा द्वितीयपंक्तिः पूर्वांकेनापि पूरणीयं। एवं यावता षोडशापूर्यंकालभ्यंते तावत्
कर्त्तव्यं। एवमन्यत्रापि बोद्धव्यं। चतुरक्षरप्रस्तारे द्वितीयतृतीयपंचमनवमस्थानेषु त्रिगुर
वो गणाः॥ चतुर्थषष्ठसप्तमदशमैकादशत्रयोदशस्थानेषु द्विगुरवः॥ अष्टमद्वादशचतुर्दश
पंचदशस्थानेषु एकगुरवः॥ प्रथमस्थाने चतुर्गुरुः॥ षोडशस्थाने चतुर्लघुः॥ एवं पंचाक्षरादा
वपि ज्ञेयं॥४५॥ अथ मात्रामेरुः॥ दुइदुइ इति॥ ॥ पूर्ववत्प्रश्ने· द्वे द्वे कोष्ठे समे लिखितव्ये· प्रथमे द्वयं
द्वितीये द्वयं· तृतीये त्रयं· चतुर्थे त्रयं· पंचमे चत्वारि· षष्ठे चत्वारि·॥ कोष्ठशब्देनात्र कोष्ठपंक्तिरुप
लक्ष्यते· द्वे द्वे कोष्ठपंक्ती समे लिखितव्ये इत्यर्थः॥ एककलायाः प्रस्तारो न भवतीति द्विकोष्ठेवादि
पंक्तिरपि·॥ एवं कोष्ठपंक्तिषु अधोधः क्रमेण लिखितासु सर्वत्र अंत्यकोष्ठे प्रथमांकोदेयः॥ त
तः उपांत्यकोष्ठेषु एकादारभ्य क्रमेण द्वात्रिंशत्पर्यंतमंका देयाः॥ ततश्च सर्वेषां प्रथमकोष्ठे

एकं॰ ततो द्वयं॰ ततएकं ततस्त्रयं॥ पुनरेकं॥ ततश्चत्वारि॥ ततएकं॥ ततपंचतयं॥ ततः एकं
ततःषट्॥ इतिक्रमेण एकांकेन मिलितास्त्रंका देयाः॥ ४६॥ एवमाद्येत्र्यंसेतु पांत्येच कोष्टेप्रप
रोंमध्यस्थित शून्यकोष्टकेषपूरणीयकोष्टशिरोंकेनतच्छिरः कोष्टस्यपरकोष्टांकमेकीकृत्यां
कादेयाः एवंसर्वत्रज्ञेयं॥ ४७॥ अथमात्रापताका॥ ॥एकलोपेइति॥ ॥अमुकगणाःकुत्रा
स्तीतिप्रश्नेपूर्वयुगलेक्रमेणांकेदत्ते॰ शेषांके ऽन्तिमांकेपूर्वांकमेकैकक्रमेणलोपयित्वाएक
गुरुंजानीहि। एतावताएतदुक्तं॰ प्रथमांकशेषांकेलोपयित्वाऽवसिष्टशेषांकसदृशप्रस्तार
स्थानेएकगुरुंजानीहि॥ तथाद्वितीयांकशेषांकेलोपयित्वाऽवशिष्टशेषांकसदृशप्रस्तार
स्थानेएकगुरुंजानीहि॥ एवमेकगुरुमानीय॰ अनंतरमेकांतरितमंकद्वयमेकीकृत्यशेषांके
लोपयित्वाऽवशिष्टशेषांकसदृशप्रस्तारस्थानेद्विगुरुंजानीहि॥ एवमंकत्रयमेकीकृत्यशे

षांके लोपयित्वाऽवशिष्टशेषांकसहृशप्रस्तारस्थाने त्रिगुरुं जानीहि॥ एवं चतुर्गुरुपंचगुर्वा
दिक्रमानेतव्यं॥ जोपावद्दिसोपरहिमेलावडु अस्यायमर्थः। योऽकः प्राप्यते स हारको भवति
स च परं एकेन सहृ गुरुर्भवति॥ एतावतैतदुक्तं भवति॥ हारकोंकः सन्निहितपरः स्थितांकेन स
हृगुरुर्भवति॥ अन्येऽ कालघवो भवंति॥ तेन ज्ञायते प्रस्तारे एकगुरु द्विगुर्वादयोऽस्मिन्स्था
ने एवमाकाराः संतीति व्याख्यातं॥४८॥ अथ अमुकछंदसि कति गुरवः कति च लघवः संती
ति प्रश्ने कृते गुरुलघुज्ञानाय एषा प्रक्रिया॥ पुछ्लइति॥ ॥पृष्टछंदसः कलाः कृत्वा छंदो
ऽक्षरसंख्यांकं तत्र लुपेत॥ अवसीष्टैरंकैर्गुरुं जानीत· गुरौ ज्ञाते परिशेषात्लघुं जानीत॥४९॥
अथ छंदसंख्या· अट्टइसा इति॥ ॥अष्टाविंशतिस्ततः सप्तशतानि ततः सप्तदशसहस्त्रा
णि ततो द्विचत्वारिंशल्लक्षं ततस्त्रयोदशकोटीसंख्यां छंदोऽत्र सप्तविंशतिवर्णप्रस्तारस्य

विश्रामोप्ययमेव॥५०॥अथगाथाप्रकरणं॥तत्रगाहूप्रभृतीनांउद्देशंरड्डाछंदसाकरोति॥हो
इइति।चतुःपंचाशन्मात्रोगाहूभवति१गाथाचसप्तपंचाशन्मात्रा॥२॥तथाविगाथापरावृत्य
क्रियते॥सप्तपंचाशन्मात्राभवतीत्यर्थः।द्वितीयार्द्धलक्षणंप्रथमार्द्धं॥प्रथमार्द्धलक्षणंद्विती
यार्द्धं॥३॥उद्गाथः षष्टिमात्रः॥४॥गाहिण्यपिद्विषष्टिमात्राधीयंते॥५॥तथैवपरावर्त्तनेसिंहि
नीद्विषष्टीमात्रैवभवतिपरंतुउत्तरार्द्धलक्षणंप्रथमार्द्धंप्रथमार्द्धलक्षणंउत्तरार्द्धंभवतीत्यर्थ
ःएवंअन्योन्यगुणलक्षणानिसप्तरूपकानि॥स्कंधकेचतुःषष्टिमात्राभवंति॥५१॥अथैषा
विशेषलक्षणान्याहुरूपेवृद्धेइति॥पूर्वार्द्धंउत्तरार्द्धंचसमाधिकविंशतिमात्राभवंति॥अथपा
दद्वयमध्येषष्टोगणोमेरुरेवभवति॥षरमेरुइतिलघोर्नाम॥५२॥